स्मृतिलक्षयति संस्कारजन्यापित्युद्बुहेत्याहिः प्रत्यभिज्ञामप्यत्रैवांतर्भावयति सत्त्वेति संस्कारजन्यत्वेनेति स्वविषयत
तावच्छिन्नविषयकसंस्कारसहितस्वविषयेदंतावच्छिन्नलौकिकसंनिकर्षजन्यंतत्तयतादात्म्यज्ञानंप्रत्यभिज्ञा स्वविषय

संस्कारजन्यंज्ञानंस्मृतिः तत्र प्रत्यभिज्ञारूपंस्मरणात्मकंच संस्कारजन्यत्वेनो
भयसंग्रहः अन्यथाप्रत्यभिज्ञायाः पृथग्भावत्वापत्तेः संस्कारोद्बोधकास्सदृशा
दृष्टचिंताद्याः अनुभावाद्भूतस्तुन्नयनाहृयः ॥

यावद्विषयकसंस्कारजन्यंज्ञानंस्मरणंतथाचसंस्कारजन्यत्वस्योभयत्रापिसत्त्वेनेत्यर्थः उद्बोधकमेवास्यविभावोभिमत
इत्याह संस्कारोद्बोधका इति

शो० ८६

कालिंदीति यस्मात्कालिंदीश्यामत्वात्सं तन्यमानत्वाच्च तत्वेनाध्यवसिता रोमालिः सरसो वर्तुलत्वाद्गम्भीरत्वाच्च तत्वेना
ध्यवसितायानाभेः सकाशात्समेत्य प्रादुर्भूय नभसः क्रोडमनुत्तरत्वात्तत्वेनाध्यवसितमध्यस्थानः परिक्रीडते खेलतीदं

प्रत्यभिज्ञापथ्या कालिंदीसरसः समेत्य नभसः क्रोडे परिक्रीडते चक्रद्वं
द्वमिदं सुधाकरकलामाक्रम्य विस्फूर्जति। वंशोऽपि स्मरचापचापलचम
त्कारं समालंबते तस्मात्सैव कदंबकुंजकुहरे राधा परिभ्राम्यति ॥ ८६ ॥

चक्रद्वंद्वं गोलाकारत्वात्तत्वेनाध्यवसितं कुचयुगलं सुधानिरतिशयतृप्तिसाधनत्वात्तत्वेनाध्यवसितोऽधररसस्तस्या
करस्तदविनाभावात्तत्वेनाध्यवसितस्याधरस्य कलामेकदेशत्वात्तत्वेनाध्यवसितमुपरितनभागमाक्रम्य तदेकभावेना

राम. ८६

सुधाकरकलांकौटिल्याद्वंद्रकलात्वेनाध्यवसितं नखक्षतं प्राप्य शोभत इति वार्थः चंद्रस्याल्हादकत्वात्त
त्त्वेनाध्यवसितं सुखमपि स्मरचापः कामनियोज्यतारूपशरापसमाकर्षणीयत्वात्तस्य कुटिलत्वाच्च चापत्वे
नाध्यवसेयात्र कुटीतस्याश्चापलेनक्रियाविशेषणाच्चमत्कारः शोभातिशयत्वं समालंबते भजति तस्मा
त्तयाविनाऽसंभावितेतावद्धूत्कमेलनात्वैवविरतीतकालावलोकितेवराधाकर्हंवनिर्मितकुंजस्य मं
उपस्थकुहरेभ्यंतरे श्राम्यतितिष्ठतीत्यर्थः स्वत्रार्विंनामसहकृततादृशसंस्कारसंनिकर्षविभावितागम्य
मुखविकासाद्यनुभाविताप्रत्यभिज्ञाचर्वणाविश्रामधाम

नी० ८७

वदनांबुजेति । यथा मुखकमलपतद्भ्रमराश्लेषइत्यर्थः अंबुजपदेन वदनाश्लेषिणि वस्तुनि भ्रमरत्वावेदनात्रत एव कर्णा

नाकलनान्मध्यवर्तनसंकर्णाचिकीर्षितविन्यासभूषणासंसमलेस्कंधाधावर्तिसनिहरेति ईषद्वलितलोचनंस्मितेतिर

हासचित्रितमाननंमुखंस्मरामिस्मर्तुंइच्छितायामित्यर्थेकथनाश्चितयामीत्यर्थः ननुध्यानंचनस्मरणात्मकमित्युक्तवता

ग्रंथकृतास्मरणान्यज्ञानंविहितेत्युक्तंतथाचप्रतियोगिविधयास्मृतिभावावगमरादमध्यायासवेतिचेन्न तथासतिकिं

स्मृतिर्यथा वदनांबुजलग्नहरिद्रपानेमयिवध्वापवर्तंसमंसमूलेहरकुंचितदृष्टिराधिकायाः ।

कुंचितैकाक्ष्यमित्यादिमग्रंथानर्थकतापत्तेः तस्माद्विजातीयज्ञानंतत्रवहरुक (स्मितकिंमीरितमाननंस्मरामि

तात्पर्यार्थावसेयइतिनकोपिदोषः एतेनप्रकृतपद्येस्मृतिर्नभावोवाव्यस्यव्यक्त्येनालिंगितत्वान्नाप्यलंकारः सादृश्यमा

मूलकत्वात्किंतुविभावमात्रंस्वतः सुंदरत्वादिमपर्यवस्यतीतिवदंतः समाहिताः स्मृधातोर्हिस्वार्थपरतायामेवतने

षांनिरूपितानामसमरात् ननुतथापीहनिहतार्थत्वदोषादुरुद्धरमेवसंस्कारजन्यज्ञानएवतत्प्रयोगप्राचुर्यादितिचेन्न

सत्यं सप्रयोजनलक्षणातिरिक्तस्थलएवतद्दोषात् अत्रोवि

राम: ८७

धृतिंलक्षयति धृतिरिति संतोषइच्छापर्याप्तिस्तावलाभाद्येनभयशोकाभ्यामितितदुक्तंधृतिस्साधारणंलक्षणांतरमाहा
दुःखबुद्धिर्वेतिस्वानिष्टजनकत्वज्ञानंवेत्यर्थः स्वानिष्टमिष्टविरोधि द्विष्टमिष्टहानिश्चेतिद्वयमपिभवतीतिनान्यतराप्तं

धृतिः संतोषोदुःखबुद्धिर्वा विभावाज्ञानशक्त्यादयः अनुभावास्त्वव्यग्रभो
गादयः यथा भूषाभस्मरजांसिवेश्मविपिनंदेहोद्वृषोवाहनंचेलंचर्मतथापि
मन्मथारिपोर्भोगः किमुनश्यति ईशत्वंकिमुहीयतेकिमुमहादेवेतिनोगीय
तेकिंवातस्यवदेववदेवइतिवासंज्ञाजनेस्पत्यते ॥ ॥ ९० ॥ ॥८

ग्रहः भूषेति यद्यपिभूषांगरागोभस्मरजांसिसर्वस्थलभानिनतुवहुविनव्ययायासस्साध्यमृगमदचंदनादितथापि
मन्मथारिपोः कामारातेर्भोगः सुखानुभवोनश्यतिकिमु

नै० तथापद्यपिवेशमवसतितत्छानांविपिनंस्वतः स्निह्नंनतुकष्टसाध्यंसोधनाराणांहितथापितस्यात्यन्तानुषज्यते इ
शत्वंजगन्नियन्तत्वंहोपतेऽनंभवतिकिमु तथायद्यपिवाहनंसंचारसाधनंहंहोनाकलितजन्मभूमिहंषो
नंहीनतत्त्वेश्रवः प्रभृतितथापिजनैरित्यत्राप्यनुषज्यतेसमहाहैवैतिसकलश्रेष्ठइतिवाक्येनेनागीय
८८ तेनव्यवह्रियतेकिमु तथापत्यपिचेलंचीवैकमुकुककार्यश्रावरणकारिचर्मगजकृत्तिर्नत्वनर्घ्यशाट्याहित
६४ थापितस्यचदूरगतालंकारस्यापिहैवहैवइतिवासंज्ञासाम्राज्यलक्ष्मीसंपन्नेकनिरूढमपिनामज्ञेनेस्य
ज्यतेस्मिन्नप्रयुज्यतेवाकिमित्यर्थः स्वत्रगम्यविवेकविभाविताचापलोपशमाद्यनुभाविताक्षांतिस्त्वर्वैर राम ८८
नां३
राणाविश्रामधाम ॥ ॥

व्रीडां लक्षयति स्वच्छंदेति संकुच्यतेऽनेनेति करणव्युत्पत्त्या क्रियासंकोचकारणीभूता चित्तवृत्तिरित्यर्थो व्रीडांतरत्वमु
पपद्यते संकोचश्च सकलप्रवृत्तिसाध्यत्वं ननु क्रियाविरहप्रयोजकोऽप्येवं किं न कृतमित्याशंक्याह नचेति अतिर

स्वच्छंदक्रियासंकोचो व्रीडा नच शंकापत्रासेवातिव्याप्तिः
तत्र क्रियाविरह एव न तु क्रियासंकोचः अत्र विभावा दुराचा
रादयः अनुभावाः शिरोनमनवदननयनप्रच्छादनादयः

व्याप्तिं वारयति तत्रेति यतश्च तत्पादिः स्त्रीणामेव पुरुषावलोकनमात्रात्पुंसामेव च प्रतिज्ञाभंगमात्राद्व्रीडेति त
दुभयसाधारणां व्रीडाविभावं दर्शयति दुराचारादय इति

नो० ८५

भिन्नाविति काचित्कामलनयना कांतेनायकेचेलमंचलं हरति सति ह्रीतं हिशमेतेनमृणादृष्टिरावेरिता लोलं कांतरंय थास्यात्तथालोकयंतीतस्ततश्चक्षुः। सिपंत्यतएव भिन्नो भिन्नाव र्थात्कावनिर्मितावयोसंजाताभिमुख्या पांचच तु हिंगवा स्थितभित्तावपिप्रतिफलगतंप्रतिविंवतादृशम्यापत्रं भालमिंदूरांकितं रक्तकं दृष्ट्वादृष्ट्वापुनः पुनरवलोक्य केलिहोपः कौ

यथायोध्यावरीने भिन्नोभित्तौप्रतिफलगतं भालसिंदूरविंदुं ॥
दृष्ट्वादृष्ट्वाकमलनयनाकेलिहोपध्भेररा कांतेचेलंहरति ॥ ८५
हारितलोलमालोकयंती गात्रंप्रच्छादयति सहसापारिशापंकरू

त्रार्थ रुद्धापितोहोपस्तेनस्त्रीजातस्याधारत्रीज्ञाते भावोदर्शितस्तस्यपक्षेमराध्रमवशेनैतेनस्वयंनिवापितहोपोपिमशि मयेरतिमंदिरेस्वतः प्रकाशाताद्योतनाडुहात्तालंकारोलक्ष्यतेसहसामादितिगात्रमंगमेकंवचनेनावरणपिधयपयो धराद्याविष्कृतंपारिशिरेवपंकेरुहं प्रसारितांगुलिहस्तमाल्कातेन लमहंसहमसंलग्नाग्रंमासत्किं कीकृतंपद्माङ्गगलंते श्रीराम ८५

केचित्तुहरितमुपरितनकौतुहलवशोभातिशयाधायकंहरिद्वर्णामधेयंशुकमितिचेलविशेषणंकांतेहरतिसति
किंवालीभिर्हरितायस्मात्तस्मात्साहरितालिकेतिवद्धरितमपहृतंचेलंपरिधानीयंलोलंचकितंयथास्यात्तथा
लोकयंत्यत्रविषयानुपाज्ञानमेवहेतुः एवमन्यत्वंगमयंतिमायापरिणापंकेहहेरामसुकुलिनेनपारिणानागात्वंकिं
चिद्देवांगंपृच्छांचदयतीतिहरितपदंचेलपदयोरन्यतरस्यतद्धानव्यत्ययंकृत्वाक्लिष्टगत्यायोजयंति अत्र
नायकालोकनतदुराचारविभावितांगपृच्छादिनानुभाविताव्रीडावर्वराविश्रामधाम ॥ ॥

नी० ९०

चपलतां लक्षयति इतरेतरेति व्यासज्यवृत्तिधर्मावच्छिन्नक्रियानिष्ठकार्यतानिरूपितकारणत्वाश्रय इत्यर्थः ननु कारणतावच्छे
दकवैजात्यापरिचये दुर्ग्रहमेतल्लक्षणं तत्परिचये तद्वैव लक्षणमस्त्वित्यभिप्रेत्य तथैवाह क्रियाया इति शीघ्रता क्रियाशैघ्र्य
नियामिका विजातीयांतःकरणवृत्तिरित्यर्थः एषैवानालोच्यकारित्वमिति गीयते एतेनप्रक्रान्तोद्धाहस्तोविंश
तिग्राह्यकवच्छेदेन प्रयत्नानामपि विंशतिर्भवति ज्ञानानामेव यौगपद्यनिषेधात् तथा चानेकक्रियाकारणीभूताविच्छिन्नवृत्तिरेका
नास्ति प्रतिनव्यरीत्याऽस्मत्तमालंव्य प्रजल्प्यंतः समाहिताः तथापि युगपत्तावत्प्रयत्नकारणीभूतायाश्चित्तवृत्तेरप्यस्तुपगमा

इतरेतरक्रियाकारणं क्रियायाः शीघ्रता वा चपलता मात्सर्यद्वेषरागादयो विभावाः अनुभावावीरिदं

दन्यथाप्रयत्नयौगपद्यस्यैवाकस्मिकतायाद्दुर्वारत्वादस्माकं तु विजानीय एक एव प्रयत्नस्तावच्छीनवाक्पारुष्यप्रहारादि
क्रियाकारणत्वेनाभिमतः किं वा तत्कारणतावच्छेदकप्रयत्नकारणीभूतान्येवैकमन्यदेतत तावत्प्रयत्नसमुदाय एव चपलतापद
वाच्य इति तु युक्तमुत्पश्यामः कारणतास्वरूपलक्षणवाक्येपि तरदितरदिति चेष्टाकारणस्यानेकत्वं स्फुटयितुं बहुपुस्तके
पुवचनपाठस्य दर्शनादपि च कारणतावच्छेदकत्वरूपलक्षणवाक्येपि क्रियतेनेनेति क्रियाप्रयत्नस्तस्य शीघ्रता यौगपद्यमित्यस्य

रानुसारादित्थं व्यासज्यवृत्तिधर्मस्य कार्य
तानवच्छेदकत्वेपि न क्षतिरिति मंतव्यं वैरिदर्शने
शत्रुगवेषणं

९०

लंकाचारिणीति लंकाभिमुखगमनशीले सेतुबंधकारिणि रामसंग्रामे यात्क्रीडाहेलाक्ष्माश्रितो व्यापारस्तेन च मत्कारिणापह्नुते
षोढं प्रतिपक्षोहृज्जननसमर्थस्तथा द्वीपात्साहसमुद्धतं वयहव: सिंहनाहस्तइद्धो षिणिरामे दाशरथो सुरो ये धनुश्चापं धुन्वाने
प्रत्यंचाकृषणेन टणात्कारयति सतिततस्यात्रिलोकीजयिनोपि दशाननस्य रावणस्य करश्रेणाय: करणानां विंशतिरपि वक्र
वचनमेकेकप्रक्षेपसमासक्तानभिमुखमसव्यापसव्यवाहुद्वयस्य सव्ययोरेवोपर्यधस्तात्पसव्ययोरेवोपर्यधोगा: सव्यापसाव्य

यस्यां लंकाचारिणि सेतुकारिणि रणक्रीडाचमत्कारिणि प्रोटानं दशव: प्रसारिणि पुरो रामे धनुर्धु
न्वति जाता तस्य दशाननस्य समरप्रारंभदंभस्फुरत्केयूरक्वणिता सुमेप विशिखत्यागा: करश्रे

योरेवोपर्यधसो स्वसमुद्दायान्सव्यसाचिनाभिव्यंजकाद्दहवलि पंचपंचपर्वानामेवसमुदायाश्चत्वारो वक्रवचणाय:
नार्थइतिकश्चिदाह तद्दंभसाभिधानं समरेति दंभोगर्वस्तेनोनस्फुरणामत: समरेत्पादितादिशेषणां तथा च समर: प्रा
रम्भते येन ताद्दशो दंभो येनेति सुमनत्यारंभ: संग्रामात्मकेन फलेनोपहितो यद्दशास्तवे गोत्रदंभो नाथस्तेन व्यावलोता
वाहुभूषणस्य रणितेनानुमेया शरवनतु दृश्या वेगातिशयाद्दृश्याश्चप्रक्षेपा यासां तथाभूता जाता इत्यर्थ: ॥ ॥ २ ॥

नै० ६१ नचात्रवक्रमाणाममर्षरूपव्यंग्यत्वेनैवोपपत्तौ किंचपलतायाश्चाधिक्येनेतिवाच्यं राघवयोरामामर्षस्यचिरंतनत्व
यायुगपत्तावक्रियाणामिहप्रथमतायाश्चानुपपत्तेः अभिनवोद्दितकार्यस्यकारणेनाप्यभिनवोद्दितेनभ
वितव्यं नतुचिरंतनेनेतिचपलतायाश्चाधिक्यात् नह्यमर्षप्रकर्षएवाभिनवंकारणमस्त्विति चेद्द्वयोर्मत्तावैते
वमिद्धनः समीहितं हर्षमद्द्योरिवामर्षचपलतयोः पार्थक्यस्यानुपपत्त्वहस्तितत्वात्प्रकर्षस्यताद्दृश
विजातीयप्रयत्नप्रयत्नकलायाश्चान्तरोपहितत्वएवपर्यवसानादमर्षत्वावांतरजातेर्मानाभावाद्दित्या
ख्यातावत् अत्रधनुर्ध्वनिसमुद्दीपितमात्सर्यविभावितायुगपत्सर्वभुजकरणाकप्रहाराऽनुभावितावपल राम·
तावर्वरणाविश्रामधाम ६१

हर्षंलक्षयति चेतइति प्रसादः प्रसादहेतुः सुखंतेनांतरत्वमायाति प्रियदर्शनेनेति दर्शनंज्ञानमात्रंदृष्टेत्यायाद्दितिवक्त्र
नुवास्तुषमेवदृष्टोरिष्टश्शेराहुरितिवेत्तेनवीक्षणायव्रजतोमुकुंदाहरणेदर्शनातिरिक्तप्रियश्रवणादेरेवविभावस्यगम्यत्वेपि
नक्षतिः पुलकितेनेति राधामुकुंदस्यश्रीकृष्णस्यसुखमेवाङ्गदकत्वादिंडलेनराधावक्षुषोश्चकोरत्वमावदयनोत्कंठा
गम्यतेतस्यवीक्षणायावलोकनार्थंपुलकितेनेतिसंजातपुलकाकुचविवकुंभीतेनोच्छूनोन्मुखत्वमावेद्यतेतयोः पालिमं

चेतः प्रसादोहर्षः प्रियदर्शनपुत्रजननादयोविभावाः अनुभावाः पुलकस्वेदाश्रुस्वरभेदाद् =

यः यथा पुलकितकुचकुंभपालिराधाव्रजतिमुकुंदमुखेंदुवीक्षणाय विरचयतिनमध्य

उलंघ्यत्रकमेरीणायथास्यात्तथाव्रजतियातिमध्यस्यतनोरपिभंगाद्भयात् भंगभीतिंगणयतिनापिनितंबगौर

याभीतिंनाविरचयतिकरोतिनितंबस्यगौरवाणिवहुववनंकुचयोर्गौरवाभिप्रायमतएवनितंबपदमजहल्लक्षणायाकुचा
वपिवक्तिगतिविरोधीन्यपीतिशेषः नगणयतिनानुसंधत्तइत्यर्थः अत्रगम्यप्रियसमागमश्रवणविभावितपुलको
गमुख्याद्यनुभावितोहर्षस्सर्वगाविश्रामधाम॥

नै० ८२

आवेगं लक्षयति आकस्मिकेति आकस्मिको यदृष्टस्य वानिष्टस्य वा निपातः स विवर्तो मुख्यकारणं यस्य तादृशो मनोविका
र इत्यर्थः जडतायामतिप्रसंगाल्लक्षणांतरमाह संभ्रमो वेति संभ्रमपदार्थो वेत्यर्थः वैरिदर्शनाप्रियश्रवणोत्पादिदर्शन
श्रवणो ज्ञानमात्रे तदुक्तं आवेगो राजविद्रावणाद्यैः संभ्रमो मतः तत्र विस्मरणं स्तंभः स्वेदः कंपः स्खलद्गतिरिति ए

आकस्मिकेष्टानिष्टनिपातविवर्तः संभ्रमो वावेगः वैरिदर्शनाप्रियश्रवणोत्पातादयो विभावाः अनुभा
वाः स्मरणशरीरस्खलनविपर्यासादयः यथा एको वामसि विश्लथे सहचरीस्कंधे द्वितीयः करः प
आरूढक्षितिवक्षुरेकमितरद्वर्तुं मुखे भ्राम्यति एकं कंटकविद्धमस्ति चरणं निर्गंतुमुत्कंठते वान्यदे राम० ८२

कइति रघुपतेः सेनाचराभटानालोक्य दृष्ट्वा वैरिमृगीदृशां कातराक्षी (रिमृगीदृशां रघुपतेरालोक्य सेनाचराश
राणामेकः करो विश्लथे त्वराधावनगलितवाससि द्वितीयः स्खलितावलंबनाय सहचरीस्कंधे व्याप्तस्तस्थे कचस्कः पश्च
र्पृष्ठतो गच्छति धाटीपरीक्षायै इतरच्च मार्गभेदप्रसंगभयाद्वक्तुं रथ्यादृष्ट्येग्रेगच्छतो सुखे मुखपदेन मुखानवलोकनेन तु सर्वत्रैव
वभटस्तु द्विरेवतासामितरर्थो ध्वन्यते भ्राम्यति एकं चरणं कंटको विद्धमस्ति मार्गानालोचनादन्यत्र गंतुं वाविंतुमुत्कंठते भयाति

अत्रसेनाचरदृर्शनविभावितस्त्वरास्खलनानुभावितस्त्वावेगश्वर्वेणाविश्रामधामपर्यायावामम पतिसुपर्यां
तमकस्मान्मध्येरथ्यं तयासमालोक्य पत्स्खलितमाशुगत्यानचिरात्फलितं मनोरथेस्मासन्त्वत्रप्रियदर्श
नविभावितस्खलितानुभावितः मतर्थेतिविवेकः नव्यास्त्वाकस्मिकोचिंतितवलवन्नरानर्थप्रतिपत्ति
संभृतइष्टानिष्टनिपातसेष्टानिष्टयोर्द्वयोरपिसमच्चिन्त्यारंभस्यविवर्तः कारणमित्यर्थः संभ्रमइतितुस
कलव्यवहारविषयत्वप्रदर्शनेनकार्यविशेषपरिचयद्वाराकारणपरिचयोभवतीतिप्रदर्शनार्थं संभ्रमपदा
र्थत्वस्यपरंशक्यतावच्छेदकापरिचयादुर्ग्रहतास्वकोत्रवाकारः अतएवनोदाहरणान्यूनताप्यतएतवे
ष्टानिष्टनिपातपदस्याग्रिमेष्टानिष्टदर्शनपदेनतुल्यार्थत्वमपीतिनसंदर्भविरोधइतिप्राहुः ॥ ॥

नै० ९३
93

जडतां लक्षयति सकलेति कार्याकार्यविवेकभिन्नज्ञानवत्त्वमित्यर्थः यत्किंचिद्विषयकविवेकभिन्नं ज्ञानमतिप्रसक्तमिति
विवेकत्वावच्छिन्नसामान्यभिन्नत्वं ज्ञाने प्रापयितुं सकलेति विवेकशून्यत्वमेवास्तु किं ज्ञानघटनयेत्याशंकते नचेति स
माधत्ते तत्रेति न च स्वप्ने ज्ञानमस्त्येवेत्यतिव्याप्तिर्नाट्यवस्तुत्वमिति वाच्यं ज्ञानपदेन मानसान्यज्ञानविवक्षणात् मान

सकलव्यवहाराक्षमज्ञानवत्ता जडता नच मूर्छापस्मारनिद्रास्वप्नेष्वतिव्याप्तिः तत्र ज्ञानविरहा
त् इष्टानिष्टदर्शनादयो विभावाः अनुभावास्त्वनवभाषणानिर्निमेषप्रेक्षणेष्टानिष्टापरिच्छे

सत्वं च जातिरिति न ज्ञानसामान्यस्य मनोजन्यत्वेनासंभवः इष्टानिष्टादर्शनादय इति इष्टज्ञान दादयः ॥ रस० ९३
सहितानिष्टज्ञानमित्यर्थः साहित्यं सामानाधिकरण्यमभेदो वेति बोध्यं आदिना चिंतोत्कंठाविरहभयप्रभृतयः ॥

दुष्पारेति येकपयोदुरामाद्यपारस्यपयोधेः पारंतीरंप्रत्युद्दारंश्चकटीभवद्वीर्यवलंयस्मिन्कर्मणियथाभवतितथागच्छतोदृ
श्यमानाद्धनुमतः सकाशाद्धसितंहर्षाद्वितेनुर्विस्मारितवंतस्तस्यनीरनिधेः समुद्रस्यनीरंजलमधीरवीचीतिनीरस्य

यथाद्दुष्पारवारिनिधिपारमुदारवीर्यमारागच्छतोहनुमतोहसितं
वितेनुः उद्वीक्ष्यनीरनिधिनीरमधीरवीचिचित्रार्पिताइवपुनः क
पयोवभूवुः॥

विधिविशेषरांस्तुधमुद्वीक्ष्यपुनस्तत्रथैवचित्रार्पिताइवनिश्चेष्टतयासंभाव्यमानावभूवुः अत्रहनुमन्नीरनिधिनीरोभ
यविलोकनविभावितानिश्चेष्टतानुभाविताजडतावर्णनाविश्रामधाम

नै० ९४

९५

गर्वं लक्षयति आत्मनीति द्वयोरपि समानसंवित्तिवेद्यतया विनिगमनाविरहेणातत्त्वमायानितत्त्वैथेवाह सर्वस्मिन्निति
तथा च समबलयोर्विरोधात्मको विकल्पो वा शब्दार्थोऽन्यथा द्वयोरेकत्र निवेशेऽन्यतरस्यैव पर्यापत्तेरिति भावः निःपीत इति

आत्मनि सर्वाधिकत्वबुद्धिः सर्वस्मिन्नधमत्वबुद्धिर्वा गर्वः बलैश्वर्याभिजनलावण्यादयो वि
भावाः अनुभावास्त्ववज्ञाभ्रूदृष्टिवेष्टितहसितपौरुषप्रकाशादयः यथा परशुरामवाक्यं
निःपीते कलशोद्भवेन जलधौ गौरीपतेर्गङ्गया होतुं हन्त वपुर्ललाटदहने यावत्स्वतः प्रक्र
मः तावत्तन्मया विपक्षनगरीनारीदृगम्भोरुहद्वन्द्वप्रस्खलदश्रुवारिपटलैः स्पष्टः पयो
राशयः ॥ २ ॥

कलशोद्भवेनागस्तिना जलधौ समुद्रे निःपीते शोषं चुलुकिते सति गङ्गया भागीरथ्या वपुः शरीरं गौ
रीपतेः पार्वतीजानेर्ललाटदहनेन निटिललोचनाग्नौ होतुं प्रभसुंहेतोनिरवेदि यावद्यावत्कालमध्ये उपक्रमः उद्योगः कृत
आरब्धस्तावत्तावत्कालमध्य एव ॥ ॥ २

राम० ९४

मयेत्यर्थान्तरसंक्रमितवाच्यमनन्यसाधारणंप्रभावंवक्ति तत्रैश्वर्यविपक्षेतिशत्रूणांनगरीषु एतेनाने
कपयोधिपर्याप्तनाश्रुशोणानिर्वहितायानार्यस्तासांवक्षःस्थपंभोरुहास्यमांसिरोहन्तिसमुत्पद्यन्तेयेभ्यस्तेषांहृ
ह्रमितिवहुसंख्याकानांनारीणामप्यपेक्षयाद्वैगुण्यमावेदयितुंततः प्रस्खलद्गतिशयेनोक्तकल्पद्युस्रुस
ङ्गवारिजलैस्तस्यपटलंसमुदायोत्रवहुवचनंसमुदायगतवाहुल्यंकथयत्पयोराशिवाहुल्यंद्रष्टुमति नैः
कृत्वापयोराशयोकूपाराः स्पष्टाइत्यर्थः स्वत्रगम्येनवलेनस्वर्यादिनाविभाविनः पौरुषप्रकाशाद्भा
वितोगर्वस्त्वदरागाविश्रामधाम

नै० ९५ 95

विषादंलक्षयति इष्टसंशयइत्यादि अनिष्टजिज्ञासायामपिविषादव्यवहाराद्वाहानिष्टजिज्ञासावेतितथाचेष्टसंशया
निष्टजिज्ञासयोरन्यतरावगत्यर्थमत्रवाकारः अयमेवव्यवच्छिन्नविकल्पइतिगीयते इष्टपदेनेच्छाविषयसामान्य
इष्टसंशयोनिष्टजिज्ञासावाविषादः इष्टपदेनजीवनधनयशः शरीरपुत्रकलत्रादयः विभा
वाञ्चपराधधनगमनादयः अनुभावाउत्तमानांसहायान्वेषणोपायचिंतादयः मध्यमानां
विमनस्कता अधमानामिष्टध्यानधावनमुखशोषणनिद्राश्वासादयः ॥ एम ॥ एम·
मेवग्राह्यंनतुप्रियजनगांधर्वकाव्यसेवाभिरिसाहावविष्टविशेषएवतासहेष्टपदेनेति प्राग्वदत्रापिप्रकृतिभेदेः रा० ९५
नानुभावाभिधतइत्याहोत्तमानामिति ॥१॥

प्रत्याहृत्येति मध्ये वर्त्म मार्गस्य मध्ये कलानिधेश्चन्द्रस्य समुदयो जातः किमातन्यतां कोऽभ्युपायः कर्तव्य इति कस्याभि
सारिकोक्तिः यदि प्रत्याहृत्य भवनं निजं व्रजामि तर्हि वाचां श्च्यवः प्रतिज्ञाहानिर्भवेद्यदि वा निकुंजमेव गच्छामि तर्हि तनः ग
हे हृषोद्घाटनाय विशिष्यानिर्देशः किं स्यात्कोऽनर्थश्चापतेत्को वेद को जानीते न कोऽप्यहं तु सुतरां न जाने यदि कश्चिद्देवो भय

यथा प्रत्याहृत्य यदि व्रजामि भवनं वाचां भवेत्प्रच्यवो निर्गच्छामि नि
कुंजमेव यदि वा को वेद किं स्यादिमः तिष्ठाम्येव यदि क्वचिद्वनतटे ॥
किंजातमेतावता मध्ये वर्त्म कलानिधेः समुदयो जातः किमातन्यतां

भिन्न एव वनतटे उभयतः संकटोऽहो ह्यासीन्यमालं व्यतिष्ठाम्येतावता किं जातं न किमपीष्टानवाभेरनिष्टावाप्तेश्चतादृ
वस्थ्यादित्यर्थः अत्राभिसरणात्पापराधाविभावितोऽनिष्टिनिवारणाच्चिंताद्युभावितो विषादश्चर्वणाविश्रामधाम ॥

नै० औत्सुक्यंलक्षयति कालासहिष्णुत्वमिति प्रियप्राप्तौविलंबोमास्त्विति नीच्छेत्यर्थः ननुद्दिष्टकालेनाभिनवसंबंधोविलंब
५६ स्तथाचप्रियसमागमेनाभिनवसंबंधीद्दिष्टः कालोमास्त्विति नीच्छातद्दितिनिष्फलितंतदपेक्षयेष्टः कालः प्रियसमागमे

९६

औत्सुक्यंकालासहिष्णुतासकलेंद्रियाणामेकदैवक्रियाप्रारंभो
वाप्रियस्मरणादयोविभावाः अनुभावास्तंद्रागात्रगौरवादयः

नात्वसंबंधीभवत्विति नीच्छेवौत्सुक्यमस्कलाघवाद्व्यापकत्वाच्चेत्यतस्तथैवाह सकलेति सकलानामिंद्रियाणामेक राम॰
कालीनायाक्रियाव्यापारस्तस्यप्रारंभः समुत्पत्तिर्यस्याः सकाशात्साधुनैवास्यप्राप्तिर्भवत्विति नीच्छारूपांतः करणाद्दि ५६
त्तिर्वेत्यर्थः अस्तिह्यौत्सुक्याद्व्यापारशैघ्र्यमितिभावः

स्वाद्यइति प्रातर्हरसमागतनायकायानायिकायाः सखीप्रतिसख्यावातथाविधनायिकांप्रत्युक्तिः हे सुंदरिसादिवासर
स्याद्दिवसस्याद्यः प्रथमोयामः प्रहरः कैरपिस्तुमात्रसाक्षात्कृतैः केलिकौतुकैनिक्रीडाचमत्कारगोचरमनोरथ्यैर्द्वितीयः
पुनर्मल्लीकेसरचारुचंपकनवांभोजस्त्रजांगुंफनैर्ग्रथनैस्तृतीयः कांचीकुंडलहेममहारवलयन्यासैर्नीतोयाम्छितस्त्वनंतरं पि

पथा स्वाद्यः कैरपिकेलिकौतुकमनोराज्यैर्द्वितीयः पुनर्मल्लीकेसचारुचंपकनवांभो
जस्त्रजांगुंफनैः कांचीकुंडलहेममहारवलयन्यासैस्तृतीयस्तुतोनीतः सुंदरिवासरस्यचर
सोयामः कथंयास्यति

संप्रतीतियावच्चरमोयामः कथमितिचिंतांगमयतिकेनोपायेनयास्यतिगमिष्यतु
त्कंठयाकार्यांतरास्फूर्त्यादिवसहेर्घ्यस्येवप्रतिपत्तेः मल्लीतिवङ्कवचनंपुनः पुनः सातिशयकलानिर्माणाभिप्रायं
कांचीतिवङ्कवचनंत्वरयान्यासात्पुनः पुनः स्वसनाभिप्रायं शेषंस्पष्टमेव अत्रगम्यप्रियसमागमनविभावितंगात्र
गौरवचिंतानुभावितमौत्सुक्यंचर्वणाविश्रामधाम

नो० ९७

प्राक्स्वस्य चेतोमीलनं निद्रामीलनं वा ज्ञानजनकव्यापाररहितं पुरीतत्संबंध इति यावत् स्वप्नं स्वप्न इन्द्रियान्तरसंबंधविरहकाली
नत्वगन्तर्गतस्वप्नवहनाडीमनोयोग इति यावद्द्वितीयं इति तेषां मते निखिलबाह्येन्द्रियसंबंधविरहकालीनस्वप्नवहनाडी
वा त्वग्देशावच्छिन्नत्वङ्मनोयोगस्य विभिन्नव्यभिचारिभावनापत्तिर्निद्राया इव भोवनस्य तत्रापि सत्वान्मनोधर्मत्वाच्च न
या पुरीतत्संबंधस्य स्वप्नपूर्ववृत्तित्वनियमो न घटते सुषुप्तेः प्रागपि स्वप्नसंभवात् तथा च त्वक्प्राङ्गि देहदेशे नियामककाला

इतरदिन्द्रियमपहाय मनस्त्वचि यदा वर्तते तदा निद्रा

भस्त्वत्यनुशयानो निद्रान्तर्गत एव स्वप्न एवं सुषुप्तेः प्रागवस्थां निद्रेति तत एव सुप्तात्प्राङ्गि देहदेशस्थ त्वाशयेन निद्रां लक्षय
ति इतरदित्यादि तदा तत्कालीनान्तःकरणवृत्तिरिति शेष स्वप्नमग्रेपि यद्यपीन्द्रियमपहायेत्येव वक्तुमुचितं तत
थापि त्वचि स्थितमतिरिक्तं वा प्रवृत्तो यामिन्द्रियं येन मन्वते तेषां त्वचश्च एवं इन्द्रियत्वमभिमतमिति तन्मतेनाधोमात्रसांख्याद्दि
तोत्क्रमभिहितं त्वगिन्द्रियप्रसिद्धत्वक्शब्दोल्लासशिक इत्यन्ये तथा च प्राक्तिस्विकरूपेणापहाराणालाभात्सर्वमत ९७

सर्वेंद्रियाक्रियासंपातलक्षणौत्सुक्यानंतरं सर्वेंद्रियाक्रियाशैथिल्यलक्षणां सुप्तमेवगणयितुमुचितमित्याशंकां मयाचि
कीर्षुराह सुप्तस्येति स्वप्नस्यनिद्रांतर्भावं दर्शयति स्वप्नवहेतिनाडिकायामित्यत्रार्थककप्रत्ययेन तस्मात्स्वगा

सुप्तस्यकारणात्स्वात्सुमात्माद्विद्राभवेत्तेनोक्ता स्वप्नवहनाडि
कायांमनोयदावर्तेततदास्वप्नसंभवः तत्रविभावाः स्वभाव
चिंतालस्यक्लमादयः अनुभावाः पार्श्वकरणनयन
चालनविभ्रमवचनस्वप्नदर्शनादयः ॥ ॥ २ ॥

त्मतावोध्यते ॥ ॥ रामः श्रीः श्री० श्री० श्री० राम० श्री०

नै० ९८ गच्छन्निति मयामेव खंडः श्रीकृष्णः स्वप्ने दृष्टः कीदृशस्तपनदुहितुर्यमुनायाः कच्छं तीरं प्रतिगच्छन्नथापिच्छगुच्छाव
तंसः किंचास्मद्वदनं कुंचितेनाक्ष्णा सकृद्वारंवारं पश्यन्नपिचास्निग्धः प्रेमपूर्णोपांगो नेत्रप्रांतो यस्यापरं च शिथिलचर
णः सालसपदपद्मोत्यन्यच्चस्तोकविसृष्टहासः किंचिल्लक्ष्मसर्वविकासमिव इतरच्च कमलकलिकामंडनः कमलकु
98

यथागच्छन्कच्छंतपनदुहितुः पिच्छगुच्छावतंसः पश्यन्नस्मद्वदनममकृच्चक्षुषाकुंचितेन
स्निग्धापांगः शिथिलचरणः स्तोकविसृष्टहासः स्वप्नेदृष्टः कमलकलिकामंडनोमिव
खंडः ॥

ड्मलभूषण इत्यर्थः अत्रचिंताविभाविता स्वप्नदर्शनानुभाविता वा रसेंद्रियमीलनरूपा निद्राचर्व राम०
णाविश्रामधाम अत्र कवेरिहसूक्तिसौष्ठवं यत्स्वप्नेदृष्ट इति स्थाने निर्दिष्ट इति पठिते प्राचीनाभिमतस्तमोद्भावहरणामेत ९८
हेवानामंत्ररणीयामंत्ररामनुभावो निद्राविभाव इतिचविशेष इति

अपस्मारं लक्षयति ग्रहाद्यावेश इति भूतसंचारादिसंभूतो व्याधिविशेष इति भावः सामान्यतया व्याधिनिर्देशेपि विशेषतया पुनर्निर्देशोर्थविशेषद्योतनाय तथाहि सामान्यतो व्याधिर्वीभत्सभयानकविप्रलंभकरुणेषु भवति तत्रा

ग्रहाद्यावेशोपस्मारः तत्रविभावाः अपावित्र्यशून्याधिष्ठितिधातुवै
षम्योत्कटदुःखभयादयः अनुभावाः कंपफेननिश्वासभूनिपात
विपर्यासजिह्वालोलनादयः

यं विशेषो यद्वीभत्सभयानकयोरपस्माराख्यो व्याधिविशेष एव भवति नापरः विप्रलंभे करुणयोस्तु कदाचिदपस्मारः
कदाचिदपरोपीति

नै० उद्वेल्लद्दिति उद्वेल्लंतोयेनवाः पल्लवास्तएवाधरस्तेचाधरोष्ठस्तद्दशायेषांतेधरपद्दवेपमानस्याधरस्यैवसंल्लक्ष्याह्रशिान्नःसार
५५ शपर्यातिपत्तिविकाशकतयोक्तं तथापर्यस्ताः प्रसारितायाः शाखास्ताएवभुजायेषांतेएवंस्फूर्जंतः प्रकाशमानाये

99

यथा उद्वेल्लन्नवपल्लवाधररुचः पर्यस्तशाखाभुजाः स्फूर्जत्कोरकफेनविंदुपटलव्याकी
र्णाद्देहश्रियः भ्राम्यद्भृंगकलापकुंतलजुषः श्वासानिलोत्कंपिताः शैलेप्रज्ञकपेर्निया
तितमपस्मारेद्रुमभ्रूरुहाः

कोरकास्तएवफेनविंदवस्तेषांपटलैः समुदायैर्व्याकीर्णाव्याप्ताद्देहश्रियोदेहकांतयोयेषांतेर्किंचभ्राम्यद्भिर्भ्र एम०
योभंगाणांकलापः समुदायएवकुंतलः केशपाशस्तज्जुषस्तद्युक्ताअन्यच्चश्वासभूतेनानिलेनोत्कृष्टकंपभाजः॥ ॥ ५५

मूरुहाः द्रोणाद्रिप्रहस्तग्रहस्ताः शैलं द्रोणाद्रिं कपेः रक्षः शक्तिप्रपातमूर्छितलक्ष्मणसंजीवनौषधिशालि द्रोणाद्रि
मानयतो हनूमतः सकाशादभिपातितं किमिदमिति संदिहानेन भरतेन बाणं संधाय पातितमिति शैलस्य विधि विशे
षणं प्रेक्ष्य दृष्ट्वापस्मारस्तु चैः प्रपतनं दृष्ट्वा धूतवंत इत्यर्थः ॥ अत्र महीतटे हस्तमारोप्य मारणादुरवविभावितो वास्तविक

मूर्छाप्यत्रैवांतर्भवति ॥ राम ॥ श्री०

भूनिपातानुभावितस्या हार्यारोपविषयीकृतस्यापस्मारस्य वर्णनाविश्रामधाम मूर्छापीति ॥ तस्यान्यस्यापस्मा
रविभावानुभावकथाधिक्यादित्याशयः ॥ ॥

नै० सुप्तंलक्ष्यति त्वचमपीति अपिनालप्रवहनाडीसंबंधेत्वक्परित्यागोनास्तीत्यावेदितं पुरीततिपुरीतत्समाख्या
१०० तेनाड्यां श्वासेति कापिबालामुरारेर्भुक्तुंदृस्मनिभृतानिभृतंतन्द्रागरयाशंकयामंदमंदमंतः स्मेरंहासगर्भितंयथा
100
त्वचमपिविहायपयत्नामनः पुरीततिवर्ततेतदासुप्तं निद्राविभावः अनुभावानेत्रमीलनप्रलाप
श्वासोच्छ्वासादयः यथा श्वासोच्छ्वासप्रचलद्वक्षोजापांतमामीलिताक्षंक्रीडाकुंजेतपन
दुहितुः सुप्यतः श्रीमुरारेः अंतः स्मेरंनिभृतनिभृतंकापिकर्णावतंसं काचिद्बाहोः क
नकवलयंद्दाममुष्णातिकाचित्॥ एम०
स्यात्तथाकर्णावतंसंकर्णिकारं काचिद्दिह्ध्वानतथैववाहोःकनकवल १००
यंकंकणंकाचिद्दूर्त्तोद्दाममालांमुष्णातीतिसर्वत्रसंबध्यतेचोरयतीत्यर्थः ॥ ॥ ६ ॥ ॥ ६ ॥

अत्र किंशब्दावृत्तिर्व्याप्तिर्भेदश्चेतिपादः नद्याराधार्द्धस्यान्तेऽत्रातिशयं द्योतयितुं तेनावतंसहरणापेक्षया कौट
कहरणे धार्ष्ट्यमपेक्षितं ह्यामहरणात्तु नहृष्यातिशयितमिति सूचितं तेन च त्रिविधापि अपिनायिकापात्रनुरा
गो हरौ ध्वन्यते कीदृशस्य मुकुन्दस्य त्यांकाशायामाह तपनदुहितुरिति यमुनायाः कुंजे लतामंडपे पधि
करणे स्थासेति स्थास्यादिकेन सातिशयंकंपमानोधरप्रान्तो यत्र यथा भवति तथा एवमामीलिते अक्षि
णी यत्र यथा भवति तथा हृष्यतेः अत्र कृतकरणास्य पुरुषादि समाप्तिमात्रे द्योतकत्वमपि वाद्वेः रपि भावादिव
हाकनिगमात्तस्य मृग्यतीत्यादिप्रयोगसाधुत्वाय अवश्यं वक्तव्यत्वात्साधुत्वं कुंज इत्यधिकरणसप्तमी
निर्देशादिव शयानस्येत्यर्थात्तथा मनाग्व्याघातशंकावकाशोऽपीति ध्येयं अत्र शयने विभावितं स्यामाद्य
नुभावितं चेतोमीलनरूपं स्तंभं च विरामविश्रामधाम

नै० विबोधंलक्षयति इंद्रियाणामिति प्राथम्यंविभावदर्शनेनैवदर्शितंभवतीतितमाह निद्राच्छेदइति बाह्येंद्रियमी
१०१ लनोच्छेदइत्यर्थः अतएवस्वप्नेनातिव्याप्तिः येतुचेतोमीलनंनिद्रेत्याचक्षते तन्मतेनिद्रानाशोत्तरंजायमानोबोधो
विबोधइतितेषामेवलक्षणंव्याकुप्येत यत्त्वर्वाचीनैर्निद्रेत्यस्यत्वङ्मनोयोगइत्यर्थप्रदर्शनमकारितदनवधानात्
101

इंद्रियाणांप्रथमप्रकाशोविबोधः निद्राच्छेदोविभावः अ
नुभावास्त्वंगास्फोटजृंभाक्षिमर्दनांगुलिमोटनादयः॥ ६॥

वेतिप्रतीतमुक्तत्वाद्धि। तथासतिसुषुप्तेरेवत्वङ्मनोयोगनाशसाध्यत्वसंभवान्नातिव्याप्तिरेवस्यात्॥ नचनिद्राच्छेद राम०
इत्यंतस्यत्वङ्मनोयोगइत्यर्थस्तथाचत्वङ्मनोयोगसहकृतेंद्रियजन्यत्वंपर्यवसितमितिनातिव्याप्तिरपीतिवाच्यं॥ १०१
तथासतितथाभूतमनोजन्यत्वात्स्वप्नज्ञानेव्याप्तिर्दुर्वारैवेति

राधायाइति राधायाहृशाकृत्वाहेवसक्रीडाविरस्यकंसद्विषः श्रीकृष्णस्य सहसावलोल्लोलाश्चंचलास्त्रपांगतरंगानेत्रप्रांतक
टाक्षपांभंगोरचनातत्रचतुरंकुशलंनेत्रांबुजमस्यांबुजपदंसारूप्यमपिकार्यस्यकारणेन समंविदुरिति समालंकारन्यायेन नतरं
गात्रुकृत्यायोकनोस्मान्पातुरक्षत्वित्यर्थः कथंभूतयाहृशानभः क्रीडामंडपांतरालकुवलयस्यततत्वेनाध्यवसितनेत्रस्य
क्षेरणीमुकुलीभावस्तयाहरिद्वंगहितंकुर्वत्यानितर्यग्गविकसंत्येतियावद्विचनभोहरिदृपदृयोः समभिव्याहारेणराधाकृ

पयाराधायाः सहसाहृशाकुवलयश्रेणीहरिद्वंनुभः कुर्वत्याकलकंठकंठनिनदैः सांकेतिकैर्जाग्र
तः श्रंगाकृष्टिविवर्तमानवपुषोहेवसकंसद्विषोलोलापांगतरंगभंगचतुरंनेत्रांबुजंपातुनः ॥ ॥

क्षयोर्द्वयोरपिनेत्राणिमुकुलीभूतानिनसंतीत्यर्थमावेद्यतातयोः परस्परंकटाक्षाश्चभवन्नित्यर्थोध्वन्यते कुर्वत्याइ
तिसविसर्गपाठेतुराधाविशेषणमेवनदृशेतितुकरणेनिक्रियांप्रत्येवकरणेतृतीयेतिबोध्यं कीदृशस्यकंसद्विषःसांके
तिकैः संकेतकृतैरतणवलकंठस्यकोकिलस्यकंठनिनदैरव्यक्तध्वनिभिलक्षत्वेनाध्यवसितैराधाझंकाराहिभिरितियावत
जाग्रतोविछिन्ननिद्रस्यपुनः कीदृशस्यांगाकृष्ट्याविवर्तमानंप्रत्यंचद्वपुः शरीरंयस्यतादृशस्येत्यर्थः श्रत्रनिद्राछेद

नै० अमर्षं लक्षयति परेति परकीयाहंकारस्य प्रशमने योत्कटा समीहा सेत्यर्थः अद्येति भर्त्रा रामचंद्रस्याज्ञाप्रवर्तनेना
नैव नास्त्येव तदुक्तं वीरमारुतेनेत्यामन्त्र्य सुग्रीवं समुल्लंघ्य शीघ्रमाश्वास्य जानकीं विन्यस्य पुरतस्तस्यान्यागच्छमपि
१०२ जीवतीत्येतावन्मात्रस्य रामचंद्राज्ञाविषयत्वात् श्लोकार्थस्तु शीघ्रं समुद्रं समुल्लंघ्य समनंतरमेव सुग्रीवं तस्याः पुरतो
102 पराहंकारप्रशमोत्कटसमीहामर्षः विभावास्त्ववमानाधिक्षेपादयः अनुभावास्तु स्वेदशिरःकंपनयनारु
णत्वादयः यथा अद्याज्ञानैव भर्तुः सरसिजनयनाम्बुमेनासमेतं वद्ध्वा लांगूलमूले दशमुखमभितो
भूतले भ्रामयामः शम्भुन्मार्गावलोकप्रचलनयनया सीतया साकमेनां लंकामुत्साद्य किं वा रघुपति
विन्यस्यान्यथा रक्षोमायाभ्रान्त्याविश्वसनीयता प्रसज्येत पश्चात् ज्ञानाशं चरणांभोजयोर्योजयामः ॥ ॥६ राम०
काकुलां जानकीं समाश्वास्य तस्याः सम्यक्समाधानं कृत्वा मपि जीवति सति शीघ्रमित्यर्थः त्वया विलंबिते विलंबाम १०२
हि स्मो मेमपुनर्दर्शनमसंभावितमेवेत्याशयः अगच्छ एहीत्यवसेयः ॥ ॥ राम० ॥ ६ ॥ ६

यथेच्छमितथा मदिदृक्षं संपादयेत्युक्ते त्वं किं कुर्या इत्याकांक्षायामाहाद्येति इदानीमेव सरसिजनयना मंदोदरी गृहमे
धिनैः स्त्रीप्राधान्यादृष्यार्हितत्तयाश्राद्धिर्हेशः स्तनुर्मेघनादाद्यैः सेनाचवाहिनीत्येवं द्वंद्वसमासस्तथा च प्रकृतार्म
र्षपरिपोषार्थं जडनामा विश्वक्तं तु पुत्रमित्रकलत्रादिभिः सहपुणपदे वासौ हंतव्य इत्यनेन स्त्रीवधानौचित्यात्प्रति
भात्मकेष्टानिष्टापरिच्छेदरूपस्त्वहनुभावस्याविष्क्रियत इति काव्यार्थिसंपंथाः एतेन धर्मशास्त्रविरोधपरिजिहीर्षु
भिः कैश्चित्सरसिजनयनास्तनुस्त्वमेनाचेतिद्वंद्वस्त्र्याश्रितः समस्तः सरसिजनयनापदानर्थक्यापातात् न
तु कस्य स्तनुरित्याकांक्षानिरासायनहीति चेन्मा वोरान्तु स्तनस्त्वस्तनुर्भव कस्य सरसिजनयने त्याकांक्षायालला
वृत्ताप्यनुवृत्तेः न त्वर्थाद्यावरास्यैनत्यध्यवसीयतामिति चेत्सत्यं नावैव वक्तव्या तद्व्ययेभवद्दीयाशंकापीति वा नवैतिनि
मीलितनयनविभावयत्तुभवान् अत एव च सरसिजनयनायाः स्तनोः सेनेजितनुहृत्षद्वयमपि व्याख्यातं न

रा०

त्यद्दह्यस्याप्यानर्थक्यापातात्ताभिः समेतं पुच्छं दृढशणखंडावगाममभितः समंतात्लांगूलमूले पुच्छे बध्वाभ्रेते भ्रामयाः
मोभ्रामयित्वा पातयामः श्रीरामनिकटे पराहत्य गमने विलंबमाशंक्याह किंवेति अथवेत्यर्थः शस्त्रनिरंत
१०३ रं मार्गविलोकी मार्गप्रतीक्षातया प्रचलेनयनेयस्यास्तया इयं च स्वभावोक्तिरंतरांतरावाधद्बुद्धिपराहतामपि
१०३ श्रीरामस्यवातद्दुह्यंतप्रापकस्यकस्यापि वौत्सुक्यभरसमाहृतां संभावनामलंकरोतीत्यवगंतव्यं सीतयासाकं
साद्धमेनां रक्षोगणाकीर्णां लंकामुत्पाद्योन्मूल्य रघुपतिचरणांभोजयोर्हृद्वचनेनानन्यपरायणानीवेद्य
तेयोजयामस्तथासति शीघ्रं प्राप्ताहृतेसत्त्वैव च लंकानिर्दलनसहकरात्वादित्याशयः अत्र प्राक्सर्वैर्देवा
होपद्धषिकपावयंनवीक्षिताएव ननु केनापि कर्मणापरिश्रांतास्म इत्यपसमर्थ्यं कथंचित्स्वकाभाद्युष्टिनेम एम.
पिबहुवचनेस्वसमभिव्याहारमात्रेणावगमयति अत्राक्षः कृताधिक्षेपाहिनागम्यनाविभावितः प्रहृषा १०३

अवहित्थं लक्षयति आकारेति आकारो निर्वेदाद्यनुभावो भ्रूविक्षेपादिः व्यवहारस्तद्याभिन्नरूपविषयोक्त्यादिस्तयोः सं-
गोपनं संवृत्यनुकूलान्तःकरणावृत्तिरित्यर्थः त्यक्तेति सबन्धुरपि विभीषणः स्वगृहं त्यक्त्वागतवानतो शक्यं बन्धनोपि पापो यो नि-
धिः समुद्रो बद्धः क्रान्तसेतुः सोपि परमात्मापि रावणः किंचित्करिष्यति परकलत्रापहरणान्न भृष्यत्यतः कारणात्सीताम-
र्पयन्तामित्येवं रूपं सहृदयस्य वचनमाकर्ण्य स्मेराननो वहेलितसुहृद्गणवचनो रावणः सुहृद्गणं कोपपरिरंजितो

आकारव्यवहारसंगोपनमवहित्थं विभावा व्रीडाधार्ष्ट्यकौटिल्यगौरवादयः अनुभावाः अन्यथाक-
रणान्यथाप्रेक्षणान्यथाकथनादयः यथा त्यक्त्वा सत्त्वविभीषणः समगतवान् बद्धः स पाथोनिधिः
किंचित्कुर्यति सोपि सारणिरतः सीतापरित्यज्यतां इत्याकर्ण्य सुहृद्गणस्य वचनं स्मेराननो रावणो

र्पयाहासस्यान्यसंभूतत्वमवगमयितुं मुक्तादाम मौक्तिकमालां करेणात्तं मुक्तादाम करेणाकंठसविधे कीरस्य
मरस्मितात्रेणाकीरस्य कंठसविधे शुकस्य मुखाभिमुखं विन्यस्य नीहमसो दाडिमीवीजबुद्ध्या श्लथानि कदाचिदिति परीक्षितुं
करतलेनोपनयतीत्यर्थः अत्र गम्यधार्ष्ट्यविभावितमन्यथाकरणानुभावितं गर्वाद्यनुभावभंजनस्याकारस्य मुखविको-

नो० १०४

104

उग्रतां लक्षयति निर्दयत्वेनेति प्रचंडक्रियाकारणीभूताकिंस्यकरोमीत्याकारिकेच्छेत्यर्थः दोषकीर्तनचौर्यादयश्चेति स्वा
पदोषकीर्तनस्यावधनाद्यपहरणादयश्चेत्यर्थः कोदंडमिति प्रचंडैर्दीप्तैः रणेति संग्रामे खंडिता ये राजानस्तेषां यासु
जास्ताभिरेवदंडैर्दीर्घो यः कोदंडं धनुः कृतं रचितं तत्र धनुषि ज्यासिंजिनी प्रतिपक्षेति शत्रुभूतानां राज्ञां या रमण्यस्ता
सां वेणीलक्ष्मणोस्तंतुभिर्गुंफिता कृता विशिखो वाण एकवचनेनैकस्यापि लक्ष्यं न लभ्यत इत्यर्थस्त्रावेष्टितः क्रूरः
उग्रता निर्दयता विभावास्त्वपराधदोषकीर्तनचौर्यादयः अनुभावास्तर्जनताडनादयः यथा कोदं
डं रणाभिन्नभूपतिभुजादंडैः प्रचंडैः कृतं तत्रज्या प्रतिपक्षराजरमणीगणोर्गुंफिता क्रूराकारकुठार
नारपतनप्रश्रेष्टदुष्टहृत्पिशुनदंतनलैः कृतोस्ति विशिखस्तल्लक्ष्यमुद्दीक्ष्यते ॥ ॥ एम० ॥ एम·
कठोरस्याकारः स्वरूपं यस्य तादृशस्य कुठारस्य तारमुच्चैर्यत्पतनं माद्यानान्तु कृतक्रियामात्रं तेनैव प्रभ्रष्टाः प्रत्यंव
तो दुष्टाः क्रोधाविष्टा ये हृत्पा हन्ति न तेषां तु घ्नंति हृत्पिपत्रस्यं वनेदंत यो रेवाद्यानाडज्यमानानिमानि दंतनलानि तैः कृ
तोस्ति न तु पूर्वं कृतत्वविशिखोलक्ष्यालाभात् नहलक्ष्यं तद्योग्यं लक्ष्यमुद्दीक्ष्यते इति रामं प्रतिपरशुरामस्योक्तिः ॥

त्रगम्प्यद्यस्तुभंगरूपापराधविभाविनानज
नानुभाविनो ग्रनावदेणाविश्रामधाम

एम·
१०४

मतिं लक्षयति यथार्थेति निर्धारणात्मकमितिशेषः लाटीति मूढैः शास्त्रचिंतारहितैः कविभिर्लाटीनयनादि लाटदेशो

द्भूतनायिकासंबंधिनो लोचनयुगलस्य कुचकलशस्य लीलागृहस्य भुजविस्तारस्य वंदनपंकस्य वनितस्य शोनहरिनंदिव

यथार्थज्ञानं मतिः अत्र विभावाः शास्त्रचिंतादयः अनुभावाः शिष्योपदेशभ्रूक्षेपकरचालनवानु

र्यादयः यथा लाटीनेत्रपुटीपयोधरघटी क्रीडाकुटीदोस्तटीपाटीरद्रववर्णनेन कविभिर्मूढैर्दि

नं नीयते गोविंदेति जनार्दनेति जगतीनाथेति कृष्णेति च व्याहारैः सममप्यत्र हे कमनसां प्रसोप

रिक्रामति ॥ ॥

सा नीयतेति वाह्यते तदेक मनसाम व्याभिचारि भाक्ति भाजां एवं सां सम यो गोविंदेति जनार्दनेति जग

तीनाथेति कृष्णेति च व्याहारैः परिक्रामति अत्र सर्वत्रेति शब्दः प्रत्येकं प्राधान्यस्य जगतीति द्योनिर्देशश्च परस्पर

द्यं पत्यस्य प्रतिपादकः अत्र शास्त्रविमर्शो विभाविनाचानुर्यानुभाविता मतिस्थर्वेणा विश्रामधाम ॥ ॥ ॥ ६

नो० १०५ 105

नयादीनामाधिक्यमाशंक्य परिहरति नयेति मलमुद्धाहरणादिशेषइंतरस्य नीतिशास्त्रप्रसिद्धार्थज्ञानस्य स्य नयस्य लोक
हृत्तानुवर्तनरूपस्य विनयस्य सत्याभिलाषज्ञानरूपस्य अनुनयस्य चोद्धाहरणानिगतार्थ यदनुपदेशमुद्धाहरति उपदेशाय
येति वस्त्विति वस्तुधनं प्रदेयं खलतो दुष्टात् अवधेयं सावधानतया रक्ष्यं मनो हरस्य चरणौ निधेयं तत्स्थापनीयं कृतिभिः

नयविनयानुनयोपदेशोपालंभाश्चैवांतर्भवंति उपदेशो यथा

वस्तु प्रदेयं खलतो ऽवधेयं मनो निधेयं चरणो हरस्य निजं विधेयं कृतिभि

विधेयं विधेर्विधेयं विधिरेव वेत्ति

स्वार्थपरापरयोर्निजं विधेयं स्वाधिकारि कर्तव्यं विधिविहितक्रियारूपं विधेयमनुष्ठेयं विधेर्दैवस्य विधेयं ज्ञापरणायं फलं विधि राम.
र्ब्रह्मैव वेत्तीति तेन कर्मफलस्पृहापरित्यागपूर्वकं विहितकर्मानुष्ठानमुपदिष्टं भवति ॥ ॥ ॥ राम. ॥ राम. ॥ १०५

उपालंभं विभजते उपालंभ इति निर्हेत्वर्थः प्रणयात्मा प्रणयेनात्मा स्वरूपं यस्येति अन्यः कोपात्मा प्रणयपूर्वक इत्यर्थः एवमन्योप्यन्यु
पूर्वक इति बोध्यं पाषाण इति काचित्स्वप्रेयांसमवलोक्य विरहव्याकुला समीत्वत्समागमवशान्मे मर्यदं एवस्त्वेति वक्तुं मनो
भुवमुपालभते हे स्मर भूमिपाल भगवन् क्रोधान्तुधा किं नाम धावसि वह त्रिषु पानाक्रामसि ननु त्वयं दृष्टपदार्थे किमित्याक्रमने ष्क

उपालंभोपि द्विविधः प्रणयात्मा कोपात्मा च प्रणयात्मा यथा पाषाणो यदि मार्दवं यदि पयो धारां दृ
गाशो दरे व्यालीनां वदने सुधा यदि दरे वर्गे हिमानी यदि त्वद्धामा किंच समीरणो यदि ततः शाखी वने भवेत्तत्तव
तां किं नाम स्मर धर्ममिपाल भगवन् क्रोधानुधाधाव

त्यत्राह पाषाण इत्यादि मार्दवं प्रस्तरे यदि पयो धारा हुता
शो दरे यदि सुधा व्यालीनां जात्यैव स्वभावेनापि क्रोधाधिकेन सुधाया अत्यंतासंभवाय स्त्रीत्वेन निर्देशः वदने यदि हिमानी
महद्धिमं रवेर्गर्भे यदि किंच समीरेवायोस्त्वद्धामा स्त्वैर्यं यदि भवेत्तदा स्त्वेनेत्यताभवेन्नेन नायकस्य कोठरागांतः करणात्त्वं व्यंग्य

नो० १०६ अमर्षएवेति कोपपूर्वकनिंद्रायाः पराहंकारप्रशमविषयोत्कटसमीहारूपामर्षसामग्रीत्वेनतद्व्याप्यत्वादितिभावः जनयंसीति
हे देवदेव वामेरणायरमेस्वारोतंसेत्यनेनमहाजनपरिगृहीतत्वमुक्तं स्वभावदुष्परिहार्यत्वेमाशंक्याहसुधांशविति नात्राविरु
द्धएवार्थः प्रतिपाद्यतेयथा लोहितोयस्तुवर्णेनमुखेपुच्छेचपांडरः श्वेतः खुरविषाणाभ्यांसनीलोवृषउच्यतइत्येनेनलो

कोपात्मामर्षएवांतर्भवति यथाजनयसिजगदेदेवदेवदेवाभर
णास्तुधारसशीतलंसुधांशो उरसिवहसिमितथा पितापपद
पतिवक्रमखवासिकिंब्रू ॥

हितोनीलसंज्ञयेत्याशंक्यनेत्याह जगादिति सुधेति स्मृता ॥
भिषकशीतलमेवतेनायामव्यवहेश्रेवाध्यनेजनयसिकरोषितथापिहित्स्वरूपत्वपिमेउरसितापंवहसिप्रापयसितहेशरदेव एम. १०६
न्वमेवक्रुरूषपरंतुपदुपतिवक्रसखावक्रंसत्वायस्पतथायस्पतथासीतिहेतारहंकिंब्रवीम्यनोचित्यात्किंचिद्रणामीतिवंद्री

106

व्याधिं लक्षयति ज्वरादीति ज्वरादेः संभूतो मानसो विकार इत्यर्थः अयमेव ग्लानिनिद्रानतपाशात्मकः ज्वरनिद्रानमेवान्नवि भावइतिप्रतिपादयन्नादिपदग्राह्यं दर्शयति कुपितधातुरिति कामक्लेशादय इति विरहादय इत्यर्थः तदुक्तं एकैकशो द्वंद्वशो वा त्रयाणां वा प्रकोपतः वातपित्तकफानां स्युर्व्याधयो ये ज्वरादयः इह तत्प्रभवो भावो व्याधिरित्यभिधीयत इति

ज्वरादिर्विकारो व्याधिः कुपितधातुकामक्ले
शादयो विभावाः अनुभावा दशोपद्रवाः

दशोपद्रवा इति अभिलाषः स्मृतिश्चिन्तानिधनं गुणकीर्तनं व्याधिः प्रलापउन्मादो जडतोद्वेग इत्यमीत्युक्ता दशावस्थाः अत्र व्याधिशब्देन शारीरं संतापकार्श्याद्युच्यते रसमंजर्यां तथैवास्य लक्षणप्रणयनाद्विवेचयिष्यते चेदमुपरिष्टात्

नै० १०७ 107 ज्ञातुमिति तस्याः श्यस्कन्तायाः कुरंगीदृशः कान्तराज्ञाः केयूरंवाहुभूषणांकनृस्त्रीयमनर्घ्यंदृशीधित्यसुन्दलंपदंगाङ्कन्त्पंज्ञातुंवि
नरीतुंकनकांगुलीयकंस्वर्णोर्मिकामानेतुमाकारयितुमिवर्वहिः त्वस्कानमतिक्रम्यगच्छति हेकस्मैतावद्गमारणाद्द
न्यदृधिकंकिंनिवेदयामितस्याः वैराणीमिषात्केशपाशनूटीव्याजात्कालियोलोचनवारिबहुलीभूतंकज्जलाहितकालि

यथा ज्ञातुंस्त्रीयमनर्घ्यंदृशीधितिपदंतस्याः कुरंगीदृशः केयूरंकनकांगुलीयकमिवानेतुंवहि
र्गच्छति अन्यत्कस्मैनिवेदयामिकिमितोवैराणीमिषात्कालियोदृष्टोलोचनवारिकालियस
रोभ्रांत्यापरिश्राम्यति ॥ ॥

मवदृष्ट्वाकालियसरोभ्रांत्यायामुनहृदबुद्ध्यायद्यपिस्वसरइत्येवव्रकुसुविंतत एम.
तथापिकालियसरः पदंस्मनत्रप्रसिद्धिविशेषमाहत्यनयोक्तं परिभ्राम्यतिपरितोवर्ततेकेशसंनहनाभावाद्वासमंततो १०७
वेणीवलातइतिभावः अत्रविरहविभाविनोश्रुपातानुभावितोव्याधिश्चवैराग्यविश्रामधाम ॥ ॥ ॥ ॥ ३

उन्मादं लक्षयति विनेति सुखाद्युद्देश्यकावरणफलको मनोविकार इत्यर्थः तत्र सुखाद्युद्देश्यकत्वरूपावरणविशेषणाभावे यो
ऽपि नैवं कुमाशंकते नचेति नैवं गम्यागमनस्य सफलत्वेन कुर्यान्निष्फलं कर्मेति निषेधविध्यविषयत्वेन तत्कर्तुर्विगानेन
स्यादित्यत आह क्रियेति नसमीचीनानवलवदनिष्टाननुबंधिनीति अपिवंरस्य मतद्विगाननिमित्तमन्यदफलत्वात्तथा गेवत्

विनाविचारमाचार उन्मादः नचागम्यागमनातिव्याप्तिः विनाविचारमितिपदेन व्यावर्तनात् तत्र
सुखमुद्देश्यं तदुद्देशाविचारस्यैव क्रियानसमीचीनेत्यन्यदित्यत अप्रेक्ष्यकारिणोन्माद इतिपद्यस्य मतं तत्र
दूषणं तत्र विभावाः प्रियवियोगविभवभ्रंशादयः अनुभावा वृथालपितवृथारोदनादयः ॥

यावत्सामान्यनिषेधविध्यविषयत्वेऽपि विशेषतः परदाराभिमर्शननिषेधादेव तस्य विगाननिमित्तभावः बलवदनिष्टसा
धनताबुद्धिनिरोधानफलिकांतःकरणाद्वृत्तिरुन्माद इति मतमुक्तदोषेण दूषयत्यप्रेक्ष्यकारितेति ॥ ॥ ॥ २

नैषेति एषापरिदृश्यमानाकाप्यपूर्वदृष्टाशिशिमतीकांचनलतास्वर्णवल्लीवकान्तिप्रकाशनेइत्थंनविविंतयन्नप्यात्वेतमनुषक्ता
त्वयः किंतुसापरमप्रेमास्पदीभूतामेममराधिकैवेत्थंज्ञात्वेतमन्याप्यनुषंगः ननुलतात्वरूपविशेषदर्शनाभावेप्यसंलापस्सं
भावितंजाड्यमेवतयासाइतमलदृप्यपाकरोति चेदिति यदिक्वापिकयांचित्दृष्टिपथेदृष्टाशोकानोजल्पतिनोत्तरयतितद्गनि
नहीत्यर्थः संमूर्च्छितामोहितावर्ततेभवतीत्थमेवमाशिंविविंत्यानिश्चित्यसश्रीकृष्णस्तालनामधीरैरधैर्यमत्तवकैः प्रगुं

यथानैषाकापिचकालिकांचनलतामेवास्तिमेराधिकादृष्टाचेन्नकुतोपिजल्पतितदासंमूर्छितावर्तते
इत्थंहन्तविचिन्त्यसिंचतिमुहुर्नीरैरधीरैर्दृशोर्वातंव्यानतुतेकरेणभुजयोराधायसंभाषते ॥ ॥ २ ॥

रेरेरितियावद्दृशोर्नीरैरश्रुभिर्मुहुर्वारंवारंसिंचतिवातमधिकश्वासंव्यानतुतेप्रकटयति करेणात्तीयेनभुजयोस्तत्वे
नाध्यवसितलताप्रांतयोराधायदृष्ट्वेतिव्याख्यानमुदक्षरत्वाडेपक्षं ॥ करेणाह्णाप्यभुजयोर्निक्षिप्यातितडकरेणैकवच
नान्तुगुणां ॥ करेणापरस्परावष्टंभवशंवद्वाभेशध्यवसायगोचरीभूतेनकरयुगलेनेतियावद्भुजयोरंतशलत्याधायनिह

ध्येतिप्रनमहिशाः वल्लुकरेणेतिवातविनन
नान्तुगुणामेवेतिऋतुः पथ्यासंभाषतेप्रलपती
त्यर्थः इतिदृत्तीवाक्यं ॥

अत्रच नवक्तास्तीति वाक्ये न विशेषदर्शनाभावउक्तः सैवास्मि मेराधिके त्वं विचिंत्येत्येतावता नानुरोधात्वश्रकारक
ज्ञानमात्रमुक्तं नपुनरन्यथाभानत्वेनेति नवमनाख्योद्दोषउद्भावनीयः नह्येतद्वाक्यद्वयसमभिव्याहाराद्भता
यामेवराधाभानं पर्यवस्यतीति चक्री द्वासुत्वाहरणानाश्रतिपत्त्यर्थमित्युमाहत्याभिहितवतस्मादिष्टमेवनताव
नावमनाख्योद्दोषोवतरति तस्मुनरेनांकविकुलकर्णाभिसारिणीवारंगितावद्दुनं तत्रमं ब्रदृितोष्ठपुटकपा
टनिविडितरहस्यगलार्गलमवकान्त्व यदित्तुलतांराधांविचिंत्येति समनन्तरभेपिष्यन्त ह्रीसावपिश्रामरिष्यातिति
अत्रप्रियावियोगविभावितोद्वेथारोहनाद्यनुभावितऽन्माहस्थ्वर्वयामिश्रामधाम ॥ ॥ २ ॥ २

नै० मरणं लक्षयति प्राणेति प्राणनिष्क्रमणसमानकालिकांतःकरणवृत्तिरित्यर्थः नच प्राणनिष्क्रमणकाले शरीरस्य प्रा
१०९ णसंयोगस्याभावेन कथं तदंतःकरणाद्वृत्तिसंभव इति वाच्यं क्वचिदेव कारणस्य कार्यसहभावेन हेतुत्वं यत्र कार्यसहभा
वेनान्वयव्यतिरेकौ यथाग्नेर्मरणप्रभावस्य न तु सर्वत्रैव तथा हेतुत्वं गौरवात् किंत्वेवमेव च सिद्धाभावस्याप्यनुमितौ न कार्यसहभा
109

प्राणनिष्क्रमणं मरणं विभावानुभावौ स्पष्टौ

वेन हेतुत्वमिति तार्किकशिरोमणिभिरप्यभ्यधायि अथवा सर्वेषामेव कारणानां कार्यसहभावेन हेतुत्वाभ्युपगमे जितं शा रस०
माकरैः सर्वत्र विनश्यदवस्थतादृशायां कारणत्वसामान्याभावस्य तेषामभिमतस्य तवाप्यभ्युपगमात् न व्याप्तकत्वत एवा १०९
स्वरसान्मरणाद्यवस्थालानां मूर्छा मरणपदार्थतया विवक्षयंति तन्मते कंपफेनाद्यनुभावसाम्यादपस्मारेणागतार्थ
तापत्तेः स्पष्टौ विति योगनेत्रस्पष्टाद्याविर्त्यर्थः ॥

पर्यस्तांघ्रीति परितोऽस्तोक्षिप्तौ चरणौ यत्र कर्मणि यथा भवति तथा किंच विकीर्णाः इतस्ततः पतिता बाहवो यत्र यथा भवति तथा संग्रामभू
मौ पततोऽलंकेशस्य रावणस्य केशपाशं स्प्रष्टुमनिलो वायुर्भिया भयेन न समाकांक्षतीति न वांछति पुनः करो भानुर्वेश्मं करं किरणं वक्रा
रितिं इमुख यञ्चत्रारि विंइपदि न कर किरणा पोग्पत्वमावेशितं नकिरति न प्रसारयति न गाम्बुराशिवाः तेत्वेधाम्निधज्यकोनिजालये

यथा पर्यस्तांघ्रिविकीर्णबाहुः पतन् संग्रामभूमौ भियालंकेशस्य न केशपाशमनिलस्स्प्रष्टुं समाकांक्ष
ति उष्णांशोस्स करः करं किरति न वा वक्रारिवेश्मे न वा स्वे स्वे धाम्नि मिथः कथामपि सुराः प्रव्यक्तमानन्वते

स्ते न बहुभिः संभूय कथा ह्यरापास्तेति सूचितं मिथः परस्परं सम्यक् एवतया वश्यंभाविनीमप्यतेनोद्गमी ने नै केनापि कथा
दे दैव तै तिसूचितं कथामपि तेनान्यथा व्यापारे त्यंत पराङ्मुखता दर्शिता प्रव्यक्तमिति यने नोच्चैः कथानवसरो दर्शितस्तात्र
ते इषहर्षपि विस्तारयंति तेन वाक्यार्थमांकेतिकैः पदैरेव व्यवहरंतीति सूचितं अत्र संग्रामविभावितं प्रपतनाद्यनुभावितं म
रणांच वैराग्यविश्रामधामः

नै० त्रासंलक्षयति मनोविक्षोभइति मनोविक्षोभोहिद्विधः उत्कटोऽनुत्कटश्चतत्रोत्कटोभयामर्षशुक्लमेवानुत्कोटोपिद्विविधः ग्राम्यं
११० भाविनश्चाकस्मिकश्चेति तयोरन्यतरपरिग्रहेन्यतरबाधकंस्यादित्याशंकांपरिहरति तथाचेतिभीरिति।स्यापिविशेषणेहेतुहेतुम
यद्व्यवहारान्नभीतिव्यवहारविषयत्वप्रदर्शनेनस्यापिभेदप्रदर्शिनः विक्षोभेणावविक्षोभशब्देनेव द्वयो विचारोत्काकस्मिकयो
110 मनोविक्षोभत्त्रासस्तथाचविचारोत्कोमनोविक्षोभोभीतिराकस्मिकमनोविक्षोभस्त्रासइतिविक्षोभेरौ
वहृद्ययोरेकत्वेनपरिग्रहः तत्रविभावोघोरसत्वनश्चवशाद्घोरसत्वदर्शनादयः अनुभावास्तंभस्वेदरोमांचा
रेकत्वेनेकधर्माक्रान्तत्वेन परिग्रहएकव्यभिचारिभावत्वंतथाचोत्कटान्यत्वेसतिविक्षोभशब्दवाच्यत्वंत्रा सुपातादयः
सत्वमितिफलितंबोध्यं येनत्वन्त्कापिव्यभिचारिणोभेदमाहतथाचेनीत्याहुस्तेषांमतेविक्षोभेरोवसाद्युग्रमग्रंथोविरुद्धो एम०
ननचतत्कापिनामापिव्यभिचारित्वस्याग्रेवक्ष्यमाणत्वादत्रनतत्संग्रहोग्रंथकृताप्रदर्शितइतिवाच्यं तथाप्यमर्षक्रोधान्तर्भावस्या ११०
कथनान्न्यूनतायादुर्वारत्वात् ॥ ॥

स्त्रगवानुद्दीत समुद्रो नाम्नामसमयेकुत्रापिविषयेरामवद्द्वनाद्दृतंहरीतिनामस्त्रगवानेत्तेनैवेद्धस्यशंकांवहन्नास्मिशतक्रतोरि
षयत्वंमेहिहानइत्यर्थः शतक्रतोः सकाशाद्वंकांभयंवहन्निति स्वपद्यारव्यानं सकाशादित्यध्याहारगौरवापत्तेरन्यथं
द्वादिति पंचम्यापत्तेः किंचैवं वमनाख्यदोषापत्तिरितिसार्तव्यं अंतरंमनः कांतरंवाकिंतंकुर्वन्सभगवानेतर्धीनशक्ति

यथाश्रागतोहरिनामरामवद्वहनादिंद्रस्यशंकांवहन्कुर्वन्कांतरमांतरंसभगवान्मैनाकभूमीधरः कुंच
त्पक्षतिभुग्नितस्तुतिकृतपक्षत्पंगचोलाहृतितसक्याहृतिसिंधुपंककुहरेनिर्मज्य माकांक्षति ॥ ॥ ६

युक्तोमैनाकनामाभूमीधरः कुंचत्पक्षतिवलितपक्षमूलंभुग्नितस्तुतिवाक्किनकर्णितेनैवकृतनप्रत्यंगचोलाहृतिसंपादि
तमर्वांगकंचुकावरणात्यक्तव्याहृतिधूतमौनव्रतंयथास्यात्तथासिंधुपंककुहरेसमुद्रकर्दममस्थलभाविवरेनिर्मज्जनं तं
धीनंमाकांक्षतीच्छतीत्यर्थः अन्येशत्रुनामाकर्णनविभाविनांगसंकोचाद्यनुभावितत्रासमयवर्णाविश्राममधाम ॥ ॥

नो० वितर्कं लक्षयति विचार इति अन्योहो वितर्क इति भावांलक्षणं चिंतायामतिप्रसक्तं तस्याप्यपि कथमिदं चेटेनेत्यहात्मकत्वा
१११ दित्यनुशयेनेत्थमभिहितवता विवक्षितार्थो निश्चपारुक्लइदमित्थं भवितुमर्हतीत्येवमाकारकऊहो विचारपदेनोक्त इति मं
तव्यं तं विभजते वितर्क इति विचारात्मोत्कटकोटिसाधकोपन्यासरूपविचारेणात्मास्वरूपं यस्येति व्युत्पत्या विचाररूप

विचारो वितर्कः विभावा विप्रतिपत्तिसंशयसाधकबाधकमानसमुद्भ
वनादयः अनुभावाः शिरःकंपभ्रूचालनादयः वितर्कस्तु द्वि

वेक इत्यर्थः इदमेतत्सदृशादेवं भवितुमर्हतीत्येवमाकारक इति तत्फलितो \\ धो विचारात्मा संशयात्मा
र्थः संशयात्मा संशयेनात्मा यस्येति व्युत्पत्या साधारणधर्मदर्शनजन्यसंशयरूपवर्क इत्यर्थः इदमित्थमपि भवि ए म० १११
तुमर्हत्यन्यथापि भवितुमर्हतीत्याकारक इति तत्फलितार्थः

अनध्यवसायात्माध्यवसायोविपरीतनिश्चयोनध्यवसायस्तद्विरोधीविशेषदर्शनमितियावत्तेनात्मायस्येतिव्युत्पत्त्याविशेषदर्शन
पूर्वकइत्यर्थः इदमित्थंगुणकंनवाकथंस्यादित्याकारकइतितत्फलितोर्थः संशयस्योत्कटकोटिकपदेनोक्तोर्थस्तत्रता वि
प्रतिपत्त्यात्माविरुद्धसकोटिद्वयव्याहृतधर्मस्यप्रतिपत्तिर्ज्ञानंतेनात्मायस्येतिव्युत्पत्त्याकोटिद्वयव्याहृतधर्मदर्शनजन्यसंश
यपूर्वकइत्यर्थः इदमेतद्दशातथापिभवितुंनार्हतितद्दशाविरुद्धमपिभवितुंनार्हतीत्याकारकइतितत्फलितोर्थः एतेन

अनध्यवसायात्माविप्रतिपत्त्यात्माचेतिअनध्यवसायउत्कटकोटिकः संशयः

विप्रतिपत्तेःशब्दरूपतयानंतःकरणधर्मत्वाच्चतत्पूर्वीविधानगराणिपतत्प्रचितेतिप्रजल्पन्नपास्तः यद्यपिसंशयात्मत्व
नेनगतार्थोसौभेदस्तथापिसंशयवैचित्र्यसमायातस्यहवैचित्र्यमनिवार्यमित्याशयः नचैवंविप्रतिपत्तिजन्यसंशयस्य
वैकोट्यात्मकंभेदांतरमपिदुर्वारमितिवाच्यं उक्तसंशयद्वयमात्रस्योत्कटकोटिद्वयसमर्पकत्वेविप्रतिपत्तेर्वैचित्र्यानाधायक
त्वात्॥

नी० उक्तमेहेत्वनुक्तमन्त्रक्रमेणोदाहरति यथावापीह कालिंदीति शांभवं शंभोर्धनुः पणीकृतं कार्मुकं कालिंदीत्यादि यस्तु
११२ नायांवर्तमानस्य कठिनस्य कमठस्येव कठिनां महावीरस्याप्यशक्याकर्षणमिति यावद्रामोन्नाशरथिर्बालस्य नवोदितस्य

यथा कालिंदीविलुठत्कठोरकमठक्रूरं धनुः शांभवं रामो वा
लमृणालकोमलवपुर्वंशावतंसो भुवः व्याहारश्च खराः ख
लाः क्षितिभृतां गोष्ठी गरिष्ठा एव तस्मात्केवलमेषतिमम

मृणालस्येव सस्येव मृदुलशरीरो महावीराशक्याकर्षणाद्धनुराकर्षणो श्रेयस्करो भास्करः एम० ११२
न्यशक्य इति यावन्नातिज्ञाभंगस्त्वविनाकीर्त्यनभिरूपनादर्शयति वंश इति कुलं भुवः पृथिव्या अवतंसो भूषणामेतां
वत्कालपर्यन्तमकलंकितं इति भावः

नन्तुविवाहेप्रतिज्ञाभंगोनेत्राणांपृत्यतआह खलाइति उदृष्टमत्रेयाव्याहारेह्येषोऽज्ञातवनविषयेप्रखराणिपुमांसस्तथाचयद्य
पिश्रुद्धंलोकविरुद्धंनाचरणीयमितिन्यायाद्द्वनाचारितासम्प्रजेषैवेतिभावः लोकसमक्षंनाह शापनाचारेतुपाहेयस्व
महाजनस्येत्याह क्षितिभृतामिति राज्ञांगोष्ठीसभागारिष्ठामहतोपुरस्तिष्ठनीत्यनुषंगः तस्मात्कर्तव्यापरिसम्फरैरेषा
तुहिनमुपास्यमानोभास्करोराजगतप्रकाशकः केवलमित्यवधारणोममश्वेप्यस्करः कल्याराशस्तिष्ठनीतिस्वयंवरप्रसं
गरामममवलोकयतोजनकस्यसरत्वायंप्रत्युक्तिरियं न्यत्रगामोधन्तुर्नमयेपत्रवेत्तिसरवुर्विप्रजिपतर्णाविभाविनोगम्यशिरः
कंपाद्यनुभाविनोहैवतानुगुणपहृपसाधकोपन्यासात्मकविचारश्र्वैकोभास्करसाहाय्याज्ञामोधन्तुर्नमयेहित्याकार
कजुहस्ववेगाविश्रामधामः ७

नै० सौंदर्यसरिति मनोभवेनकामेनैषाहृश्यमानादृष्टाम्भस्याद्रणामलाचगणानारेखाजगतेत्यकमेवेदंसौंदर्यमितिसूचिकालिपिः
११३ कृतांकिमिति यद्वालावण्यस्यकर्तुस्त्रिजगतीविलोकितुंदृशेनायेतिपावदुद्ग्रीविकोत्कंठनाश्रुकाभिव्यक्तिकानाडिः
किमितिभावः वेत्यथवानयनयोरानंदद्रुमस्यवर्द्धमानानंदस्यमंजरीपुष्पगुच्छः किंसमुज्जृंभतेवर्द्धतेवाहोस्विच्छायायाः
113 यथावा सौंदर्यस्यमनोभवेनगणनारेखाकिमेषाकृतालावण्यस्यविलोकितुंत्रिजगतोमेषा
किमुद्ग्रीविका स्यानंदद्रुममंजरीनयोः किंवामहत्जृंभतेराधायाः किमुवास्वभावबहुभगारोमा
स्वभावबहुभगानिसर्गरमणीयारोमालिः किमुनयनयोरुन्मीलतिभासतइतिसर्ववेत्तावेति स्म(लिरुन्मीलति ॥८
त्रवहुकोटिसाधारणधर्मदर्शनजन्यसंशयविभावितोगम्यश्चालनाद्यनुभावितः कस्मुभितवकुत्वादृशामंशयप्रवेक रस०
इयंराधारोमालिरपिभवितुमर्हतिगणनारेखादिरपिभवितुमर्हतीत्याकारकऊहस्ववैराग्यविश्रामधाम ॥ ॥ ॥ ११३

कथयेति यमुनायाः पाथसितथात्वेनभासमानेरामालिंसांतस्येवास्वर्णोवह्निमत्त्वेनावगतात्यच खंजनंतत्वेनावभासमानं
चक्षुः खेलयंत्सुतेजपंतीयंकाहष्टश्चैवत्वंकथयकथयेत्सुपहासेवीप्सातथाशारद्वेतिप्रसंनः शीतभानुस्तत्वेनावभासमानो
यंचायमपिकउद्गपत्यभिमुखमास्ते वास्तविकस्वंड्वरावायमितिविपर्ययमसमपाकरोति तदुपरीति एषः प्रत्यक्षात्तिमिरा

यथावा कथयकथयकेयंखंजनंखेलयंतोविहरन्तियमुनायाः पाथसिस्वर्णोवह्निः स्वयमु
द्यपतिकोवाशारदः शीतभानुस्तदुपरितिमिरारामिषकोवाविवर्तः ॥ ॥ ॥ २

रांतत्वेनावभासमानानांविवर्तः परिरागतिभेदोवाकोनालोचितपूर्वस्त्वंकथयेत्यनुषंगोत्रापिबोध्यः अत्रपर
वैमत्याद्दिनागम्येनविभावितः परानुयोगेनानुभावितः खंजनात्मकाविशेषदर्शनपूर्वकः खंजनाध्यवसितलोच
नयुगलेयंनायिकाभवितुमर्हतीतितिमिराध्यवसितधम्मिल्लवहिदंचमुखंभवितुमर्हतीतिचोहस्त्ववर्गाविश्रामधाम॥

नै० इयमिति विलसंतीविशेषणाश्लेषणाल्लसंतीप्रकाशमानोऽङ्गटकांतिर्वासुधाकरकलेवामृतभरैःसंभृतावधिरविंबात्मकेकेदेशाए
११४ वामृतानुस्रुतषोडशकलामूर्त्तेश्चंद्राद्धिकायस्याताद्दशीयंराधिकाननस्यावपुः किरणमालिनः सूर्यस्यकरैःकिरणैःसहेत
किंतस्मान्नराधिकानवाकनकमंजरीयतः खंजरीटंवहतितत्तनउभयथैवलक्षणपात्स्मरमहालसागात्रगौरवभारितांकेयमुन्मी
114 लतिहृदयतत्कथयेत्यर्थः स्वचाधिक्यरूपसाधकस्यसूर्यकरसहनरूपबाधकस्यवोपन्यासेनाविभावितःपरान्नुयोगानुभा

यथावा इयंनविलसत्सुधाकरकलाधिकाराधिकाकरैःकिरणमालिनः किमुसहेतनस्यावपुः नवा
कनकमंजरीवहतिखंजरीटंयतस्ततः स्मरमहालसाकथयकेयमुन्मीलति ॥ ॥ ॥ २ ॥

वितोसाधारणधर्मदर्शनजन्यसंशयपूर्वकइयंसूर्यकरसहनान्नराधिकाखंजरीटवहनान्नकनकमंजर्यपिभवितुमर्ह एम०
तीत्येवमाकारऊहस्सर्वर्णाविश्रामधाम नवोभयकोटिस्याद्धर्मदर्शनेसतिनान्यतरकोटिनिश्चयोभवितुमर्हति ११४
तथाचविवक्षितार्थानिश्चयानुकूलत्वाभावात्संदेहोहिवितर्कलक्षणमव्याप्तमितिवाच्यं स्मरमहालसत्वेनगात्रगौ
रवादिनाकयोश्चित्सहतइत्यर्थाविष्करणाननत्कोटिनिश्चयानुगुणपरस्परस्फुटंप्रतीयते:

ननु दृशावस्थास्तु काश्चन शारीराः काश्चन मानस्योऽप्यवस्थाः सन्ति यथा व्याध्युन्मादरूपे शारीरे स्तः न व्यहृथ्या व्यापार उन्माद इति लक्षणे मानसव्यापारविवक्षया न स्याप्यान्तरत्वं संभवतीति वाच्यं तथा सति प्रलापपार्थक्यानुपपत्तेः तस्माच्छारीरो व्यापार उन्मादोऽत एव रससमंजर्यां कायिको वाचिक इति द्विविध एवोन्माद उक्तो न मानसी यौ कोऽप्यान्यथा विभागन्यूनतापत्तेः प्रलापस्यां

ननु दृशावस्थास्वभिलाषगुणकथाप्रलापाव्यभिचारिभावा-
भ्यंतरे न गणितास्तत्किं स्वतंत्रा एव ते संतीति चेन्न ॥ ॥ २

तरत्वादेव च न विभागाधिक्यमन्यथा वाचिकव्यवहारस्योन्मादमध्यगणनानौचित्यादेवं व्याधिरपि शारीर एव तथैव लक्षण कथनात्तत्र व्याधेर्विकारत्वादेव राणां सात्त्विकभावस्वांतर्भावः नानाविधव्यापारात्मकोन्मादस्य च पुलकाद्यात्मनोऽय स्याप्यथ रोमांचादिषु विकारात्मकस्य तु तस्य न कस्याप्यन्यतमानस्य तासां मध्ये विंतारुमतेति तदिदं नाव्यभिचारिषु गणना स्त्वभिलाषगुणकीर्तनप्रलापात्मकेनेति कुत इत्याशंकते नन्विति ॥ ॥

नै० समाधत्ते औत्सुक्यइति द्वयोरपीच्छाविशेषात्मकत्वादितिभावः वर्णानात्मकस्मृतावित्ति तथाचतत्त्वकथाविकारएव

११५ नभवतीतिगुणकथायास्तद्रूपत्वेनकुत्रात्मंतर्भावस्तत्त्वज्ञानकोभ्रतस्मृत्यात्मिकायाएवतस्यागुणकथारूपफलवैचित्र्यमंगी

कृत्यस्मृत्यवलंबनात्ः पार्थक्यंतुद्वयोरेवसंस्कारजन्यत्वाविशेषाद्व्यभिचारिस्मृतिलक्षणाक्रांतत्वाद्गुणकथायाः स्मृति

115 व्यभिचारिभावेंतर्भावः संभवत्येवेतिभावः इत्थंचवर्णपतेगुणा वत्तयाप्रतिपाद्यतेनेनेतिवर्णानंवाक्यार्थज्ञानंतत्त्वस्य

औत्सुक्याभिलाषस्यवर्णानात्मकस्मृतौगुणकथायाउन्मादेप्रलापस्यांतर्भावात्

तिरूपमेवपर्यवस्यतीतिवोध्यं उन्मादइति तथाचतदेतल्लक्षणायोग्ये थकृदुक्तयोराचारव्यवहारपदेसमानार्थके रम० ११५

एवभवतइतिमंतव्यं इदमुपलक्षणं व्याधावुद्वेगोनिविशतेस्वलक्षणालक्षितस्याद्वेगस्यव्याधिलक्षणाक्रांतत्वात् त

थानिधनंशब्देनोक्तमरणंचेनकुत्राप्यविकारत्वान्मरणव्यभिचारिभावलक्षणाक्रांतंचेतदेवतादृत्यपिवोध्यं इत्थंचया

वच्छायत्रनिविशतेतस्याउदाहरणंतदुक्तं

संख्यानियंत्रणामसृष्यन्नाह अत्र प्रतिभातीति व्यभिचारिपदप्रवृत्तिनिमित्तमनेकरसानुगुणत्वं दर्शयति तांबूलेत्यादि ए
कत्रासनसंस्थितिः परिहृताप्रसुप्रमादूरतस्तांबूलाहरणाच्छलेनाभसाश्लेषोपि संविघ्नितः आलापोपि न मिश्रितः पोञ्ज

॥ अत्र प्रतिभाति छलमधिको व्यभिचारिभाव इति तांबूला
हरणाच्छलेन रभसाश्लेषोपि संविघ्नित इति शृंगारे दर्शनात् ॥ ॥

नं व्यापारपंत्पानया कांतं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृत इत्यमरुकपद्यं तद्य्यस्य चतुरया तया कयाचिन्नापि
कयाकांतं प्रतिकोपः ईर्ष्यामानउपचारतस्तत्कालोचितक्रियया कृतार्थीकृतः स्फुटोप्यस्फुटतां नीतः कोपप्रकाशहि
कोपापनोदनविदग्धेन नायकेन वाटुकारादिभिरेकत्रास्थितमानतयानर्थकं स्यादिति भावः

नै० ११६ 116

एकत्रदेशे। आसनसंस्थितिरूपवेशानमत्ताहरन्तः प्रत्युद्गमादुत्थायाभिमुखगमनात्परिहृतात्पक्वानांत्वलाहरणाछलेन। अत्र
छलपदं कार्येषु गौणीभूतं न तु मुख्यतां त्वलाहरणसामानाधिकरण्यानुपपत्तेरिति नवमेनाख्योद्दोषः शंकनीयः रभसात्से
षः प्रेमालिंगनं। आपि परमभिमुखगमनेनसंभावनांगमयतीति संविविग्नः स्वयमेव धावित्वागतवत्यतिभावः एवं परिजनं व्या
परयंतोपकरणाहरणाद्यैर्निरंतरं प्रेरयंत्यालापोपि प्रश्नापिच्छापि: क्रियावैदग्ध्यमाह। नमिमिश्रितः प्रत्युत्तरैरित्त्यइतिवो

रौदैवंदजालादयः हासवव्यपदेशान्यायदेशयोर्दर्शनाद्वीथीभेदगणानाञ्च

ध्यः नवेदसंश्चातन्त्र्यमित्याह॥ वीथीभेदइति॥ वीथीभेदे मार्गविशेषे॥ करणादृशात्रुश्यम्भूतन्यायशात्रइति पावत॥ गणवान्॥ रम० ११६
सत्रमध्येकुलस्यपृथग्गणानां तत। तथाचश्रावीननिबंधेतस्यगणानाप्यस्येवेतिभावः इद्दस्तुपलक्षणं॥ यदुक्तमनासेधर्मोप
स्खलेनानुविहस्तपोनकल्कोध्ययनेनकल्कः स्वाभाविकोवेदविधिर्नकल्कः प्रसह्यवित्ताहरणंनकल्कस्तान्यवभावो
पहतानिकल्कइत्याहि॥ ॥

तदिदं लक्षयति संगुप्तेति किंचित्क्रियागोपनफलकस्य क्रियांतरस्य कारणीभूतानां करणाद्वृत्तिरित्यर्थः अवहित्थं तु निर्वेदाद्यनुभा
वगोपनफलकं छलं त्वत इति क्रियागोपनफलकमिति भेदः संकेतीकृतेति निकुंजकुहरान्ततामंडपप्रान्ते स्वच्छत्वात्क्रि
यमाणाया राधामाधवयोः क्रीडाविकारो वोऽस्त्यं नोऽस्मान्पातु कथंभूतयोस्तयोः संकेतीकृतकाननं इत संकेतवनं प्रविशतोरेवम

संगुप्तक्रियासंपादनं छलं विभावास्त्ववमाननप्रतिपक्षकुचेष्टादयः अनुभावा वक्रोक्ति
निभृतवीक्षणप्रकृतिप्रच्छादनादयः शृंगारे यथा संकेतीकृतकाननं प्रविशतोरन्यो
न्यकौतूहलादन्यत्वप्रतिभानमारचयतोरन्योन्यमुद्रसयतोः कुंचत्कायमितस्ततः किसल
येरात्मानमावृण्वतो राधामाधवयोर्निकुंजकुहरादु

न्योन्यकौतूहलात्परस्परविषयककौतुकादन्यत्वप्र
तिभानमितरेतरयोरपि याथातथ्यप्रतिपत्तिर्यथा न भवति तथा व्यवहरतोः रत एवान्योन्यमुद्रसयतोरितरेतरज्ञानभीत्या सं
गितयोरेवं कुंचत्कायं विवलितांगयष्टि यथा भवति तथेतस्ततः क्वापि क्वापि आत्मानं किसलयैः पल्लवैरावृण्वतो राधाछाद
यतोरित्यर्थः ॥ ॥

नै० अत्रविलब्धव्यवहारपरीक्षाविभावितंनिभृतवीक्षणाद्यनुभावितंकुंजप्रवेशगोपनफलकंछलंवंर्वरणाविश्रामधामसमापत्तीकृता
११७ नुप्रातिभासिकसत्ताभाजः कपटांबुराशीनैंद्रजालिकसमुद्रान्नुरोपकंठेलंकासमीपेईक्षमाणाः पुनरितित्वर्थेसोनुश्चनह
117 नुमत्पराक्रमोरामचंद्रः कपींद्रस्योह्यधिकमणास्यमुखेवहृशोमखेवहृंयथास्यात्तथायोजयामासेत्यर्थः अत्रांबुराशपदभा

संग्रामेयस्या समापिकृत्मा कपटांबुराशीन्नुरोपकंठेपुनरीक्षमाणाः हृशोकंपींद्रस्य
मुखेसखेहृमायोजयामाससरामचंद्रः सर्वाणिव्यभिचारिकुलानिविस्तरभिया। राम०

सकप्रतिपक्षराक्षसकुचेष्टाविभावितंतथाहृक्पातानुभावितंस्त्रीयतत्वावगमगोपनफलकं। नोद्धाहृतानि ११७
मचंद्रनिष्ठछलंवर्वणाविश्रामधामततः सिंहोभवत्सघोयावत्तस्यांविकाशिरः छिनत्तितावत्सुरूषः खड्गपाणिरहृश्यतेत्याद्ये
रौद्रेपिछलंहृश्यतेपरंतुविस्ताभियानोदाहृियतइत्याह। सर्वाणीति॥ ॥

यत्तु कथमसौ संख्यानियमो मात्सर्योद्वेगदंभेर्ष्याविवेकनिर्णयक्लैब्यक्षमाकुतुकोत्कंठाविनयसंशयधाष्ट्यादीनामपि तत्र तत्रो
